# उपसर्गविचारः-निरुक्त-पाणिनीय-सारस्वतदिशा।

**Dr. Jinitha K S**

Associate Professor
Sree Sankaracharya University of Sanskrit

पद्यते गम्यते अर्थः अनेन इति पदम्। पत्लृ गतौ इति धातोः घञर्थे कविधानम् इति वार्तिकेन करणार्थे कप्रत्यये पदम् इति रूपसिद्धिः। भिन्नशास्त्रेषु भिन्नाभिप्रायाः द्रष्टुं शक्यन्ते पदविषये। सुप्तिङन्तं पदम् इति अष्टाध्यायीकारः पाणिनिः। सुबन्तानां तिङन्तानां च पदसंज्ञा इत्यर्थः। 'शक्तं पद'मिति न्यायसिद्धान्तमुक्तावल्यां शब्दखण्डे। शक्तिः अस्यास्तीति शक्तम्। शक्तिविशिष्टं पदमित्यर्थः। पदं कतिविधम् इति चिन्तनवेलायां महाभाष्यकारस्य वचनं मनसि आयाति यत् 'चत्वारि शृङ्गा त्रयोऽस्य पादाः द्वे शीर्षे सप्त हस्तासो अस्य। त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याम् आ विवेश' इति। पतञ्जलिः पस्पशाह्निके व्याकरणाध्ययन-प्रयोजनभाष्यावसरे एवमुक्तवान्। नाम - आख्यात- उपसर्ग - निपाताः पदभेदाः। वृषभरूपस्य व्याकरणस्य चत्वारि शृङ्गाणि भवन्ति नामाख्यातोपसर्गनिपाताः इति आचार्याभिप्रायः। नैयायिकास्तु पदं चतुष्प्रकारकं इति स्वीकुर्वन्ति, यौगिकं, रूढं, योगरूढं, यौगिकरूढञ्च। 'यत्रावयवार्थः एव बुद्ध्यते तत् यौगिकम्'। 'यत्रावयवशक्तिनिरपेक्षया समुदायशक्त्या बुद्ध्यते तद्रूढम्'। 'यत्र त्ववयवशक्तिविषये समुदायशक्तिरप्यस्ति तद्योगरूढम्'। 'यत्र यौगिकार्थरूढार्थयोः स्वातन्त्र्येण बोधः तद्यौगिकरूढम्'। एवं पदविभागविषये विविधेषु शास्त्रेषु विभिन्नाः आशयाः सन्ति। निरुक्तकारः यास्कः, अष्टाध्यायीकारः पाणिनिः, सारस्वतव्याकरणकारः अनुभूतिस्वरूपाचार्यः च पदविषयमधिकृत्य चिन्तितवन्तः। तेषां पदविषयकसिद्धान्ताः, विशेषतया उपसर्गाणां विवेचनम् अत्र संक्षेपेण कथ्यते।

**पदविभागविचारः।**

निरुक्तकारमतमनुसृत्य संस्कृतभाषायां पदं चतुष्प्रकारकं भवति। उक्तञ्च -'तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च, तानीमानि भवन्ति इति'। पदानां चातुर्विध्यम् पाणिनिः अपि अङ्गीकरोति। यास्क-पाणिन्योरिव अनुभूतिस्वरूपः अपि पदचातुर्विध्यम् अङ्गीकरोति। तत्र पदविभागेषु नाम्नः लक्षणं प्रथमं प्रदिशति।

नाम**लक्षणम्।**

'सत्वप्रधानानि नामानि' इति नामलक्षणमुक्तं निरुक्ते। सीदति गच्छति अन्वेति लिङ्गसङ्ख्यादिकमस्मिन्निति सत्वम्, द्रव्यम्। षद्लृ विशरणगत्यवसादनेषु (१५२१, तुदादिः) इति धातोः अधिकरणे औणादिकः त्वन्प्रत्ययः। नमन्त्याख्यातशब्दे गुणभावेन अथवा नमयन्ति स्वमर्थमाख्यातशब्दवाच्ये गुणभावेन इति नामानि। नाम इति णम प्रह्वत्वे (१०५०, भ्वादिः।) इति धातोः रूपम्। नामशब्दानाम् उदाहरणानि भवन्ति, गौः, अश्वः, पुरुषः, हस्ती इति।

**आख्यातलक्षणम्।**

'भावप्रधानमाख्यात'मिति आख्यातशब्दनिर्वचनम्। भावः प्रधानं यत्र तदिदं भावप्रधानम्। आख्यायन्ते क्रियागुणभावेन वर्तमानानि स्त्रीपुंनपुंसकानि अनेन इत्याख्यातम्। आङ् इत्युपसर्गपूर्वक - चक्षिङ् व्यक्तायां वाचि (१०८७, अदादिः) इति धातोः 'कृत्यल्युटो बहुलम्' (३/३/११३) इति करणे क्तप्रत्यये 'चक्षिङः ख्याञ्' (२/४/५४) इति सूत्रेण ख्याञादेशे आख्यातरूपसिद्धिः। 'सामान्ये नपुंसकम्' (वा ५०४३, पा.सू. २/४/१७) इति नियमेन आख्यातमिति नपुंसकलिङ्गं रूपम्।

तत्र "पूर्वापरीभूतं भावमाख्यातमाचष्टे व्रजति पचतीत्युपक्रमप्रभृति अपवर्गपर्यन्तम्"। उपक्रमः आरम्भः, तत्प्रभृति उपक्रमप्रभृति। अपवर्गपर्यन्तम् इत्यस्य क्रियावसानपर्यन्तमित्यर्थः। एवम् अनेकक्रियाभिः निर्वर्त्यमानः भावः आख्यातेन उच्यते। उक्तं च,

क्रियासु बह्वीष्वभिसंश्रितो यः पूर्वापरीभूत इवैक एव।

क्रियाभिनिर्वृत्तिवशेन सिद्ध आख्यातशब्देन तमर्थमाहुः।।

तथा भर्तृहरिणा अपि उक्तम् -

गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।

बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते।।

असत्वभूतो भावश्च तिङ्पदैरभिधीयते।। इति च।

भावशब्दानां उदाहरणानि भवन्ति - आस्ते, शेते, व्रजति, तिष्ठति इति। आख्यातं तु चतुर्विधं भवति, कर्तरि, भावे, कर्मणि, कर्मकर्तरि च। तत्र पचति देवदत्त इति कर्तरि। भूयते देवदत्तेनेति भावे। पच्यते ओदनो देवदत्तेनेति कर्मणि। पच्यते ओदनः स्वयमेवेति कर्मकर्तरि।

**उपसर्गलक्षणम्।**

उपगृह्य (आख्यातं तस्यैवार्थविशेषं) सृजन्तीत्युपसर्गाः, प्रादयः।

**निपातलक्षणम्।**

'उच्चावचेष्वर्थेषु निपतन्तीति निपाताः'। अनेकप्रकारकेषु अर्थेषु निपतन्ति इत्यर्थः। नि इत्युपसर्गपूर्वक -'पतॢ' धातोः 'ज्वलितिकसन्तेभ्यो णः' (३/१/१४०) इति कर्तरि णप्रत्यये निपातः इति रूपम्। पाणिनिना 'प्राग्रीश्वरान्निपाताः' (१/४/५६) इति सूत्रेण 'अधिरीश्वरे' (१/४/९७) इति सूत्रपर्यन्तं निपातसंज्ञा विधीयते।

**निरुक्तदिशा उपसर्गविचारः।**

वैदिके लौकिके च साहित्ये उपसर्गाणां महान् प्रभावः अस्ति। धातुभिः सह यदा उपसर्गाणां संयोगो भवति तदा धातुः अर्थान्तरं प्रकटयति। उक्तं च,

धात्वर्थं बाधते कश्चित् कश्चित्तमनुवर्तते।

तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधा।।

उपगृह्य (आख्यातं तस्यैवार्थविशेषं) सृजन्तीत्युपसर्गाः प्रादयः। 'न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः' इत्यत्र निर्बद्धाः इत्यस्य निष्कृष्य पदवाक्यरूपेण रचिताः इत्यर्थः।

उपसर्गाणामर्थविषये मतभेदः निरुक्ते द्रष्टुं शक्यते। प्रथमं द्योतकरूपेण ते स्वीकृताः। तत्रोक्तं भवति - 'नामाख्यातयोस्तु कर्मोपसंयोगद्योतकाः भवन्ति' इति। नामाख्यातयोः यः अर्थः वर्तते तस्य विशेष्यं किञ्चित्

उपसंयुज्य तद्बलेन द्योतयतीत्यर्थः। तदनन्तरं प्रकारान्तरेण तेषाम् अनेकार्थकत्वम् एवं विचारितमाचार्येण - 'उच्चावचाः पदार्थाः भवन्तीति गार्ग्यः' इति। उच्चाश्च अवचाश्च उच्चावचाः, नैकभेदाः बहुप्रकाराः इत्यर्थः। नामाख्याते चार्थविशेषं प्रति उपसर्गसंयोगमपेक्षते। तस्मात् उपपन्नः क्रियाविशेषः अर्थः उपसर्गस्यैव। क्रियासामान्यमात्रम् आख्यातस्य। आङादयः उपसर्गाः इत्युच्यन्ते।
उपसर्गाणाम् अर्थनिर्देशोऽपि निरुक्ते दत्तः। 'आङ्' इत्युपसर्गः अर्वागर्थे उपयुज्यते। 'अर्वाक्' इत्यस्य मर्यादा इत्यर्थः। 'प्र', 'परा', 'निर्', 'दुर्' च प्रातिलोम्यार्थे वर्तते (प्रगतः, परागतः)। 'अभि' इति आभिमुख्यार्थे वर्तते। 'अति', 'सु' इत्येतयोः उपसर्गयोः अभिपूजनमर्थः, अतिधनः, सुब्राह्मणः इत्युदाहारणे। 'नि', 'अव' इति विनिग्रहार्थीयौ। 'नि', 'अव', 'उत्' चेत्येते अपि प्रातिलोम्यार्थकाः। 'सम्' एकीभवनार्थे विद्यते। 'वि', 'अप' च प्रातिलोम्यार्थे प्रयुज्येते। 'अनु' इति सादृश्यापरभावे उपयुज्यते। सम्बन्धार्थोपसर्गो भवति 'अपि' इति। समुत्पाद्यते इत्यर्थे 'उप' इत्युपसर्गः वर्तते। सर्वतोभावः 'परी'त्यस्यार्थः। 'अधि'रित्युपसर्गः उपरिभावः ऐश्वर्यमिति अर्थद्वये प्रयुज्यते।

**<u>पाणिनीयदिशा उपसर्गविचारः।</u>**

संस्कृतव्याकरणे एकविंशति उपसर्गाः वर्तन्ते। 'प्रादयः' (१/४/५८), 'उपसर्गाः क्रियायोगे' इति सूत्रेण च प्रादीनाम् उपसर्गसंज्ञा विधीयते। प्रादयः च - प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप इत्येते भवन्ति। यद् अद्रव्यार्थः प्रादिगणपठिताः शब्दाः यादृगवस्थापन्नाः क्रियया सह युक्ताः भवन्ति तादृगवस्थापन्नाः एव ते उपसर्गत्वेन कथ्यन्ते। वार्तिककारमतेऽपि उपसर्गसंज्ञार्थं क्रियायुक्तत्वम् आवश्यकम्। तथा च वार्तिकं 'गत्युपसर्गसंज्ञाः क्रियायोगे यत् क्रियायुक्ताः तं प्रतीति वचनम्'। एतस्य वार्तिकस्य आशयोऽयं विद्यते, यत् क्रियायुक्ताः प्रादयः तम्प्रति गत्युपसर्गसंज्ञे भवत इति।

उपसर्गाणां स्वयम् अर्थप्रकाशकत्वं नास्ति। ते धातुभिः सह स्थित्वा अर्थबोधनं कुर्वन्ति इति वैयाकरणानां मतम्। अतः उच्यते – "उपसर्गेण धात्वर्थो बलादन्यत्र नीयते। प्रहाराहारसंहारविहारपरिहारवत्।।" इति। लौकिकव्यवहारे धातोः अव्यवहितपूर्वमेव उपसर्गाणां प्रयोगाः प्राप्यन्ते। एतदपवादरूपेण वैदिकवाङ्मये नैष नियमः प्रचलति। 'हरिभ्यां या ह्योक आ' इत्यत्र आङ् उपसर्गः उत्तरकालिकः दृश्यते। कदाचित् क्रियापदस्य पूर्वं संयुक्तरूपेण, कदाचित् पृथक्तया कदाचित् पश्चादवलोक्यन्ते। सैषा स्थितिः पाणिनीयव्याकरणे न स्वीकुर्वन्ति। लौकिकसंस्कृते उपसर्गाः स्वतन्त्राः शब्दाः न। उपसर्गेषु त्रयाणामेव स्वतन्त्ररूपेण प्रयोगाः भवन्ति। यथा- प्रति - स ग्रामं प्रति गच्छति। आ - आ हिमालयात् भारतस्य विस्तारः। अनु - सा रामम् अनु वनं जगाम। वैदिकभाषायाम् उपसर्गाणां क्रियायाः पृथक् प्रयोगस्य प्राप्तिभावात् एतदवगन्तुं शक्यते यत् तस्मिन् काले उपसर्गाः स्वतन्त्रशब्दाः इव आसन् इति।

**<u>सारस्वतदिशा उपसर्गविचारः।</u>**

अनुभूतिस्वरूपाचार्येण प्रणीतं भवति सारस्वतव्याकरणम्। अयं क्रिस्तीय पञ्चमशतके जीवितवान् इति प्रथा। अनेन बालानां व्याकरणज्ञानाय सारस्वतव्याकरणस्य रचना कृता। सः 'प्रादिरुपसर्गः' इति सूत्रेण उपसर्गान् विधीयते। प्र, परा, अप, सम्, अनु, अव, निर्, निस्, दुर्, दुस्, वि, आङ्, नि, अधि, अपि, अति, सु, उत्, अभि, प्रति, परि, उप, श्रत्, अन्तर्, आविर् इति प्रादयः गणः उपसर्गसंज्ञकः। तेषाम् अर्थनिर्देशः एवं भवति, प्रशब्दः प्रकर्षार्थः। यथा- प्रणम्यः। प्रवादः। 'प्रादिकर्मणि दीर्घे च सामर्थ्ये भृशसम्भवे।

वियोगशुद्धिशक्तीच्छाशान्तिपूजाप्रदर्शने'। आदिकर्मणे - प्रारब्धं, प्रकृतम्। आयामे - प्रलम्बः। सामर्थ्ये - प्रभुः। भृशार्थे - प्रतपति। सम्भवे - प्रभवति। प्रीणने -प्रतुष्यति। गमने - प्रयाति। इच्छायां - प्रार्थयते। शान्तौ - प्रशान्तः। मुख्ये - प्रवरः। अवलोकने - प्रपश्यति। शुद्धौ - प्रसन्ना आपः। प्रसन्नेन्द्रियः। प्रीतौ - प्रसीददति राजा। पूजायां - प्राञ्जलिः प्रह्वः। तत्तपरः - पितामहात् परः प्रपितामहः। एवं प्रपौत्रः, प्रशिष्यः इत्याद्यर्थेषु उपसर्गो ज्ञेयः। 'प्राग्धातोः' इति सूत्रेण उपसर्गाः धातोः प्राक् प्रयोक्तव्याः इत्यपि सारस्वतकारः निर्दिशति।

निरुक्तपाणिनीयसारस्वतव्याकरणेषु प्रयुक्तानाम् उपसर्गाणाम् विवरणम् अधः दीयते।

| | निरुक्तम् | पाणिनीयम् | सारस्वतम् |
|---|---|---|---|
| 1 | प्र | प्र | प्र |
| 2 | परा | परा | परा |
| 3 | अप | अप | अप |
| 4 | सम् | सम् | सम् |
| 5 | अनु | अनु | अनु |
| 6 | अव | अव | अव |
| 7 | निर् | निस् | निस् |
| 8 | दुर् | निर् | निर् |
| 9 | वि | दुस् | दुस् |
| 10 | आङ् | दुर् | दुर् |
| 11 | नि | वि | वि |
| 12 | अधि | आङ् | आङ् |
| 13 | अपि | नि | नि |
| 14 | अति | अधि | अधि |
| 15 | सु | अपि | अपि |
| 16 | उत् | अति | अति |
| 17 | अभि | सु | सु |
| 18 | प्रति | उत् | उत् |
| 19 | परि | अभि | अभि |
| 20 | उप | प्रति | प्रति |
| 21 | | परि | परि |
| 22 | | उप | उप |
| 23 | | | श्रत् |
| 24 | | | अन्तर् |
| 25 | | | आविर् |

| निरुक्तम् | पाणिनीयम् | सारस्वतम् |
|---|---|---|
| | प्र आदिकर्मोदीर्ण- भृशैश्वर्यसम्भव- | प्रादिकर्मणि दीर्घे च सामर्थ्ये भृशसम्भवे। |

| | | |
|---|---|---|
| | वियोग-नियोग-तृप्ति-शुद्धीच्छा-शक्ति-पूजाग्रदर्शनेषु'। आदिकर्मणे - प्रारब्धं, प्रकृतम्। आयामे - प्रलम्बः। सामर्थ्ये - प्रभुः। भृशार्थे - प्रतपति। सम्भवे - प्रभवति। प्रीणने - प्रतुष्यति। गमने - प्रयाति। इच्छायां - प्रार्थयते। शान्तौ - प्रशान्तः। मुख्ये - प्रवरः। अवलोकने - प्रपश्यति। शुद्धौ - प्रसन्ना आपः। प्रसन्नेन्द्रियः। प्रीतौ - प्रसीदति राजा। पूजायां - प्राञ्जलिः प्रह्वः। तत्परः - पितामहात् परः प्रपितामहः। एवं प्रपौत्रः, प्रशिष्यः इत्याद्यर्थेषु उपसर्गो ज्ञेयः। | वियोगशुद्धिशक्तीच्छाशान्तिपूजाप्रदर्शने'। आदिकर्मणे - प्रारब्धं, प्रकृतम्। आयामे - प्रलम्बः। सामर्थ्ये - प्रभुः। भृशार्थे - प्रतपति। सम्भवे - प्रभवति। प्रीणने - प्रतुष्यति। गमने - प्रयाति। इच्छायां - प्रार्थयते। शान्तौ - प्रशान्तः। मुख्ये - प्रवरः। अवलोकने - प्रपश्यति। शुद्धौ - प्रसन्ना आपः। प्रसन्नेन्द्रियः। प्रीतौ - प्रसीदति राजा। पूजायां - प्राञ्जलिः प्रह्वः। तत्परः - पितामहात् परः प्रपितामहः। एवं प्रपौत्रः, प्रशिष्यः इत्याद्यर्थेषु उपसर्गो ज्ञेयः। |

**उपसंहारः।**

वेदे, प्रातिशाख्ये, निरुक्ते, शाब्दिकानां च नामाख्यातोपसर्गभेदेन पदचातुर्विध्यं प्रसिद्धमस्ति। व्यवहारे स्वतन्त्ररूपेण द्विविधपदस्यैव प्रयोगात् द्विविधं पदमिति प्रसिद्धिः। पाणिनिरपि सुप्तिङन्तं पदम् इति प्राह। शब्दशास्त्रे सुप्पदेन नामोपसर्गनिपातानां तिङ्पदेन आख्यातस्य च बोधो भवति। उपसर्गनिपातौ यद्यपि प्रायः न अर्थवन्तौ, तथापि नामाख्याताभ्यां भिन्नौ। उपसर्गनिपातयोः परस्परं भेदश्च सामान्यविशेषपरतया बोध्यः। सामान्यं हि निपातः, विशेषश्च उपसर्गः। निपाताः नामाख्यातार्थयोः उभयोः द्योतकाः भवन्ति। उपसर्गाः च केवलम् आख्यातार्थद्योतकाः।

उपसर्गाः वैदिकवाङ्मये विंशतिरेव उपलभ्यन्ते। किन्तु लौकिकवाङ्मये क्रमशो विकासो दृष्टः। पाणिनिसम्मताः उपसर्गाः द्वाविंशतिः सन्ति, निस् दुसोरप्युपसर्गव्यवहारात्। एवं कात्यायनवार्तिके सारस्वतव्याकरणे च अन्येषामपि श्रन्मरुदन्तराविरादीनाम् उपसंख्यानं कृतमस्ति। तथापि मूलतो व्यापकता विंशतिरेव परिलक्ष्यते। अन्येषां श्रदादीनाम् उपसर्गत्वं श्रद्धा, मरुत् आदिपदादिनिष्पत्तये एव संघटते, अतो व्याप्यत्वमेव तेषाम्। उपसर्गाणां प्रवृत्तिः त्रिधा दृश्यते। कश्चित् उपसर्गो धात्वर्थं बाधते, यथा दानार्थे प्रसिद्धो दा धातुः आङ् उपसर्गात् ग्रहणरूपार्थं ददाति। कश्चित् उपसर्गश्च धात्वर्थम् अनुवर्तते, यथा- प्रसूते इत्यत्र सूञ् धातोः उत्पत्तिरूपार्थः एव प्रतीयते, प्रोपसर्गेण न कश्चनाप्यर्थविशेषो लक्ष्यते। अन्ये च उपसर्गाः धात्वर्थं विशिषन्ति, यथा- नमति, प्रणमति, लिखति, अभिलिखति इत्यादिषु सामान्यविशेषभावः स्पष्टं प्रतीयते।

एषां पठनेन निरुक्ते पाणिनीये सारस्वतव्याकरणे च उपसर्गाणां व्यवस्था कथं सज्जीकृता इति सुस्पष्टा। अर्थद्योतकत्वे उपसर्गाणां शक्तिः, उपसर्गाणां वैविध्यं, सम्प्रदायान्तरेषु अर्थव्यतियानानि इत्यादिविषयाः अत्र प्रस्तुताः।

**अवलम्बग्रन्थाः।**

1. निरुक्तम्, सीतारामशास्त्री, परिमल् पब्लिकेषन्स्, दिल्ली, 2014.
2. उपसर्गनिपातमीमांसा, डा.गेयकुमार झा गङ्गेशः, राष्ट्रीय संस्कृतसाहित्य केन्द्र, जय्पूर्, 2007.
3. निरुक्तम्, मुकुन्द झा बाक्षी, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली,1989.
4. निघण्टु-निर्वचन-मीमांसा, विश्वबन्धु, परिमल् पब्लिकेशन्स्, दिल्ली, 2013.
5. उपसर्गार्थ-विवेचनम्, डा. अभयनाथ झा, नाग पब्लिशर्स्, दिल्ली, 2005.
6. सारस्वतव्याकरण, श्री नवकिशोर शास्त्री, चौखम्भा संस्कृत संस्थान्, वाराणसी, 1985.
7. वैयाकरणसिद्धान्तकौमुदी, श्रीगोपालदत्तप्ण्डेयः, चौखम्बा विद्याभवन्, वाराणसी, 2008.